मीसंयुताष्टमी निषिद्ध तस्यैव वर्त्तवचनात्॥ ॥ पूर्वत्र निशीनव्याप्याप्तौ पूर्वोपवासे कृते पर दि

कालनि·सि·
२२

नेनिर्णयं नेपारणं॥ एवमष्टमीनिर्णीयजयंतीनिर्णीयते॥ रात्र्यर्द्धयद्दिने॥ याष्टमी कालरात्र्यर्द्धे केवलेन रो
हिण्या सहिता न वेत्सैषा जयंती कर्त्तव्या॥ अष्टमी रोहिणीयुक्ता निशर्द्धे दृश्यते यदि मुख्यकालः स विज्ञे
यस्तत्र जातो हरिः स्वयमिति वसिष्ठवचनम॥ अर्द्धरात्रे तु रोहिण्यां यदा कृष्णाष्टमी भवेत्॥ तस्यामभ्य
र्चनं शौरेर्हन्ति पापं त्रिजन्मजं॥ इति विष्णोत्तरपुराणात्॥ रात्र्यर्द्धे केनेन सहिताष्टमीति सामान्यत
उक्तं॥ तत्र रुद्रस्मिन्नेव दिने मध्यरात्रेष्टमी रोहिणीयोगस्तत्रास्त्र वैव कर्त्तव्या॥ तत्रापि स्कंदे मतिरे
॥रोहिणीसहिता कृष्णा मासि चाष्टमी॥ भाद्रपदेष्टमी॥ सप्तम्यामर्द्धरात्राधः कलयापि यदा भवेत्॥
तत्र जातो जगन्नाथः कौस्तुभी हरिरीश्वरः॥ तमेवोपवसेत्कालं कुर्यात्तत्रैव जागरं॥ अर्द्धरात्रे तु
योगोयं तारापत्युदये तथा॥ नियतात्मा शुचिः स्नातः पूजां तत्र प्रवर्त्तयेदिति॥ वह्निपुराणेपि॥ स
प्तमीसहिताष्टम्यां निशीथे रोहिणी यदि॥ भवेत्सेष्टमी पुण्या यावद्द्वादश वासरा इति॥ परस्मिन्ने रामः
व दिने निशीथेष्टमीरोहिणीयोगे परा ग्राह्या॥ इत्यर्थात्क्रांतं॥ यदि तन्मध्यर्द्धदिने ये दिवे येद्धरात्रो २२

रोहिणीयोगो यत्रात्रिकं॥ अथ रात्र्यर्द्धे नया॥ अविद्धायां सऋक्षायां जातो देवकिनंदनः इति न विष्णोत्तरवचनं
॥वर्ज्जनीया प्रयत्नेन सप्तमीसंयुताष्टमी॥ सऋक्षापि न कर्त्तव्या सप्तमीनाष्टमीति ब्रह्मवैवर्त्तेपि॥ अथ दि
नद्वयेर्द्धरात्रे रोहिण्यष्टमीयोगाभावे व्यवस्थामाह॥ ब्रा॥ सर्वत्रापि निर्णीतामष्टमतिथिपूर्वां तां फरेवाष्ट ध
मीं प्राजापत्यनक्षत्रयुतिः श्रावणमितायामजयंतीति परा॥ ३२॥ प्रारब्धा॥ वेदरिद्धवस्मिन्नहेहनि निर्णायगाष्टमी
न वेत्॥ परेद्युः श्रावणमीनाप्यष्टमी रोहिणीसंयुतिस्तदा यराजयंतीग्राह्या॥ विष्णुरहस्ये॥ प्राजापत्यर्क्षसंयुक्ता
कृष्णा नभसि चाष्टमी॥ मुहुर्त्तमपि लभ्येत सैवोपोष्या महाफलेति॥ वह्निपुराणेपि॥ कृष्णाष्टम्यां भवे
यत्र कलैका रोहिणी यदि॥ जयंती नाम सा ज्ञेया उपोष्या सा महाफलेति॥ वासरे वा निशायां वा यत्र युक्ता तु
रोहिणी॥ विशेषेण नभो मासि सैवोपोष्या महर्द्धिरिति॥ तथा च स्कंदपुराणे॥ उदये चाष्टमी किंचिन्नवमी
सकला यदि॥ भवेत्तु बुधवारेण प्राजापत्यर्क्षसंयुता॥ अपि वर्षशतेनापि लभ्यते न पथ्यवान वेति॥ पद्मपु
राणे॥ प्रेतयोनिगतानां च प्रेतत्वं नाशितं नरैः॥ यैः कृता श्रावणे मासि अष्टमी रोहिणीयुता॥ किं पुनर्बुध

धवारेणसोमेनापिविशेषतः॥ किंपुनर्नवमीयुक्ताकुलकोट्यास्तुमुक्तिदेति॥ किंचदृष्टमीयुतानवमीया
घेनिरोहिणीसहितानचेत्तान्यथा॥ विनाऋक्षेणकर्त्तव्यानवमीसंयुताष्टमी॥ कार्याविद्धापिसप्तम्यारोहि
णीसहिताष्टमीति॥ एवंस्मिन्दिनेरात्रौथेरोहिण्यस्तिनिशीथादूर्ध्वमष्टमीप्रवृत्तापरदिनेघटिकामपिरो
हिण्यास्तत्रापरदिनेव्रतं॥ तथाचस्कांदे सप्तमीसंयुताष्टम्यांभूत्वाऋक्षंद्विजोत्तम॥ प्राजापत्यंद्वितीयेह्नि
मुहूर्तार्द्धंभवेद्यदि॥ तदाष्टयामिकंज्ञेयंप्रोक्तंव्यासादिभिःपुरेति॥ अथजन्माष्टमीजयंत्योःपृथक्त्वे
जन्माष्टमींत्यक्त्वाजयंतीमुपवसेत्॥ तदुक्तंमाधवे॥ यस्मिन्वर्षेजयंत्याख्योयोगोजन्माष्टमीतदा॥ अंत
र्भूताजयंत्यांस्यात्स्पष्टयोगप्रशस्तितइति॥ अथपारणनिर्णयः॥ चेद्भूर्वैकशीहार्द्धरात्रसमयेतिथ्य
न्तयोगेव्रतंकृत्वान्येह्निहरिहोर्द्धतिथ्यपगमेशक्तश्चेदिहपारणं॥२४॥ प्रांतोभस्यतिथेर्निशीथसमयादर्वा
क्शतोदितराहुक्तिश्चैकतरस्यवाप्यपगमेशक्तश्चाविहीनस्यसा॥ तिथ्यूर्द्ध्वंतइहार्द्धरात्रसमयेभराक्षेप्रमानेते
तुजिःसाचेत्वदिनसोमवारसहिताश्रेष्ठाजयंतीस्मृता॥२५॥ व्याख्या॥ चेद्यदिस्पृष्टेवेदङ्कःपूर्वदिवसेअर्द्धरात्रस

रामः
२३

मयेतिथ्यृक्षयोगेइहव्रतंकृत्वाअन्येह्नरन्यदिवसेनक्षत्रतिथ्यंतेपारणं॥ शक्तस्यस्यात्॥ तदुक्तंपद्मपुरा
णे॥ कार्याविद्धापिसप्तम्यारोहिणीसहिताष्टमी॥ तत्रोपवासंकुर्यात्तुतिथिभांतेचपारणं॥ जन्माष्टमीरो
हिणीचशिवरात्रिस्तथैवच॥ पूर्वविद्धैवकर्त्तव्यातिथिभांतेचपारणमितिनारदवचनात्॥ शक्तस्यद्वयो
रंतेपारणंस्यादितिभावः॥ अष्टम्यामप्यरोहिण्यांनकुर्यात्पारणंक्वचित्॥ हन्यात्पुराकृतंकर्मउपवासा
र्जितंफलं॥ तिथिरष्टगुणंहंतिनक्षत्रंचचतुर्गुणं॥ तस्मात्प्रयत्नतःकुर्यात्तिथिभांतेचपारणमितिब्रह्म
वैवर्त्तवचनात्॥ इदंदिनविषयं॥ रात्रौविशेषमाहप्रांतोभस्येति॥ यदातिथिनक्षत्रयोःप्रांतोनिशीथ
समयादर्वाक्स्यात्तदातिथ्योरपिमुक्तौजिने॥ निशीथाव्यवहितक्षणेवानिशीथेकलाकाष्ठाविहीने
तिद्वयोःप्रांतेवाप्येकतरस्यांतेनैवपारणमुक्तं॥ शक्तेनेत्यपिलक्षितं॥ यत्तुअन्यतिथ्यागमेरात्रौतामस
सम्बन्धजसोदिवा॥ तामसेपारणंकुर्वंस्तामसींगतिमाप्नुतइत्यादिनि॥ रात्रिभोजननिषेधकावाक्यानितानि
नान्यजयंतीव्रतनिमित्तपराणि॥ ननुजयंत्यांतुप्रतिप्रसवमाह॥ नारात्रौपारणंकुर्यादृतेवैरोहिणीव्रतात्॥

चनिन्दापिनत्कुर्याद्विर्जयित्वामहानिशामितिनिबंधवचनात्॥ वर्जयित्वामहानिशामित्यत्रनिषेधप्रा
प्तोप्रतिप्रसवमाह॥ निशायांतुयोयहोक्षेहोनत्रत्रांतमथापिवा॥ अर्द्धरात्रेपिकर्तुर्यात्पारणंत्वपरेहनी
ति हेमाद्रिधृतवचनात्॥ तत्रमाविहीनस्यैतस्यात्कस्यतिथिनयोरेकतरस्यापगमेप्येकस्यांतेनुक्ति
र्भवति॥ द्वियोगेपारणंचकुर्यात्नयाभूतवारिनइतिमदेवंद्रपुराणे॥ तोनेकुर्यान्निथवापित्रांतंतार
नपारणं॥ रोहिणीसहितानैवविद्वद्भिःसमुपोषिता॥४॥ इहमर्द्धरात्रे॥ यदितिथ्यृक्षांतस्तदाशकस्यप्रा
तरेवकुर्जिः॥ तिथ्यंतेवोत्सवांतेवा व्रतिकुर्वानपारणमितिजागरानेदिवेवपरणमित्यशक्तविषयं॥
माघे जयंती चंद्रजबुधवारसहिता॥ यासोमवारसहितानराणांतेनप्रशस्तोमृता॥ तस्मात्राप्यंपयपुरा
णोक्तंजखिप्राक्॥ प्रोतयोनिगतानामितमारि॥ इतिजन्माष्टमीनिर्णयः॥ अथ दूर्वाष्टमीनिर्णयः॥
दौ दूर्वाष्टमीकान्नस्यसितगास्या हिणास्वेस्त्रणेहृदर्द्वि पिचरोहिणीह्रणमिनानोवानदायोद्विना राम:
॥ ज्येष्ठामूलनकंन्यकाकर्पटजाजोकेद्विजेरर्वनिपक्वानेकतुर्जिःकुर्धिस्य सहितांतस्कान्यकालेश्च २५

ते॥ ७॥ व्याख्या॥ दूर्वाख्यनिमित्तेयाष्टमीकासानन्नस्यसितगानाद्वयरेशुक्लपक्षगतारोहिणीनिधेमुहूर्
र्त्तेस्यात्॥ नाद्वयरशुक्लाष्टमी दूर्वाष्टमी सारोहिणीमुहूर्त्तव्यापिनीस्यात्॥ तथात्रेपुराणसमुच्चये॥ शुक्ला
नाद्वयरेमासिचाष्टमीयासितानवेत्॥ दूर्वाष्टमीतुसाज्ञेयानोत्तरामाविधियते॥ इति॥ अन्यच्च॥ मुहूर्त्तरो
हिणेष्टम्यांदूर्वायिरिवापरा॥ दूर्वाष्टमीतुसाकार्याज्येष्ठामूलंचवर्जयेदिति॥ रोहिणीमुहूर्त्तस्तुनवमोमुहू
र्त्तोज्योतिःशास्त्रप्रसिद्धः॥ अथाहर्द्वैयदिरोहिणीस्त्रणंइनाप्रा॥ वाहर्द्वरोहिणंरोहिणंनेनानप्रामा॥ त
हाग्रोद्विना॥ स्ववाकिष्यिवा॥ श्रावणीदुर्गनवमी दूर्वाचैवहुताशनी॥ स्ववविद्धाप्रपंकर्त्तव्याशिवरात्रिर्बलेर्
नमितिवृहस्पतिवचनात्॥ इदं दूर्वाष्टमीव्रतंज्येष्ठामूलरहितायामष्टम्यांसिंहस्थेसूर्येणस्त्रीभिःदेनेकर्त
व्यांसिंहस्थेसोत्रमासयेत्तुद्विनेमुनिमत्रमदतिस्कंदपुराणवचनात्॥ दुर्वाष्टमीतुसाकार्याज्येष्ठामूलंच
वर्जयेदितिहेमाद्रौवचनात्॥ शुद्धायांकर्त्तव्यमिति॥ अशुद्धायांकिंकव्यमित्याह॥ ज्येष्ठामूलनेति॥ ज्ये
ष्ठामूलनांकन्याकःघटजाजोकोगस्त्योरयःएतेषामस्मत्मेकस्मैष्टम्यांद्विजेभ्रालिणेरवनंदूर्वाद्विज

नेकर्तव्यं॥ ब्राह्मणद्वारा पूजाकार्यास्त्रीणां कर्तव्यानात्रोषमाहापद्मान्ते कमुनुजिः पद्मात्तेन सिद्धान्ते नैकवा
रं भोजनं स्यादिति॥ तथा चोक्तं॥ कर्तव्या चैकभक्तेन उपोष्य अजेयदा न वेत्॥ दूर्वामिन्मधर्ययेकमान॥ वधर्मरिव
संनयेदिति॥ पूजनेनिमवंज्ञायिलैते॥ ऐं दूर्वे पूजितायै दुर्वाहिं न्यपत्यानिनान्यथे निरोधोरन्पनइन्तु नयो॥ व
चनविरोधपरं नायं विरोधः किंतु॥ निषिद्धयोगाभावे स्त्रीभिः स्वयं दूर्वामिं छत्वा नग्निपक्वनतृणादियथाविधि
कर्तव्यं॥ निषिद्धयोगे तु स्त्रीभिर्ब्राह्मणद्वारा पूजां विधाय सिद्धान्ने नैकभक्तं कर्तव्यमिति॥ अथैकस्मिन्दि
ने कर्मकालव्यापिनी जेष्ठा मूलान्यतरयोगयुक्तान्यस्मिन्दिने स्वल्पायामपि व्रतं कर्तव्यं॥ कुचित्स
महितान्यस्यात्कालेव्रतमिति कुचिदयसेष्टाद्भवेनाप्यांसहितान्यस्वान्यत्र स्वल्पकालव्यापिन्यां
कर्तव्यमिति नान्ययर्थिः॥ अकरणे प्रत्यवायश्च॥ यानपूजयते दूर्वां मोहादियथाविधि॥ त्रिसु जन्मसु वै
ध व्यं न तेनात्र संशयः॥ तस्मात्संपूजनीया सा प्रतिवर्षं विधृजनैः॥ सुवसंतानजननि तत्पुसौख्यक रामः २५
री सदेति पुराणे समुच्चय वचनात्॥ इति दूर्वाष्टमीनिर्णयः॥ स्रोकाः॥ एषेवाष्टमीकेंद्रमेन सहिताज्ये

ष्ठाष्टमीति व्रतं भासि सिंधे रेषे न वनोष्टमी च नवमीयुक्तासितां वाचते॥ मूलाप्येदुसुनोत्रमापरदिने स्यायेदिये
नान्नवेदिक्ता नंऊनगायिताचबह्नाराऋद्रीमाप्रवते॥ ३५॥ व्याख्या॥ एषैव नाद्रसिताष्टमीइंद्रनेनज्येष्ठया
सहिता यदा भवेत्तदा ज्येष्ठाष्टमीव्रतं कार्यमिति शेषः॥ तथा चोक्तं॥ कन्यास्थेर्केष्टमी शुक्ला जेष्ठर्क्षेण हता सता
ता॥ अलक्ष्मीपरिहाराय ज्येष्ठा देवि प्रपूजयेदिति लिंगपुराणवचनात्॥ अथ महाष्टमीनिर्णयः॥ इषेआ
श्विने मासि सिताष्टमी जवतोप्यत्रो न नवमी युक्ता चेद्वा चनेदेवी पूजने ग्राह्या॥ यतः॥ अष्टम्या मुदितेनये
दिनांते नवमी भवेत्॥ कुजवारेनवेमात्रयुग्मादेवीप्रयन्नवद्धा॥ नवमीसंयुता कार्या सदा दूर्वाष्टमी — बुधैः
॥ सप्तमीसंयुता हंति पूर्वपुण्यमनंतफलमिति विरूद्धमेतत्रिरवचनात्॥ मूलयुक्तापि सप्तमीविद्धानिषि
द्धा॥ निषिद्धा॥ मूलेनापि हि संयुक्ता सदा त्याज्याष्टमी बुधैः॥ जेषामाचेणमनन्याय दृस्या हृषिदुषितेति॥ मूला
प्यारहुयुतेति॥ मूलं॥ अप्यन्यबेवनं पूर्वषा दाताप्रांयुतासु नमाश्रेष्ठेति॥ कन्यागते सवितरियाष्टमीमूल
संयुता॥ पूर्वयापाढयापाईमलतद्वैययुताथवा॥ सा महानवमी प्रोक्ता त्रैलोक्येपि सुदुर्लभेति॥ यहानवमी

दिने सूर्योदयोत्तरमष्टम्यास्त्रिमुहूर्त्तव्यापित्वान्नवमीविद्धापि परेद्युस्तत्पदवाच्या । तन्न नवमी सूर्योदयं न स्पृशति तदास
प्तमीविद्धाप्येषाह परदिने रिक्ता नवमी सूर्योदये नो नवेत्तदा नगाब्धिनाप्तमीविद्धा कर्त्तव्या ॥ तथा च स्मृतिसंग्र
हः ॥ यदा सूर्योदये न स्यान्नवमी चापरेऽहनि ॥ तदाष्टमीं प्रकुर्वीत सप्तमीसहितान्नृप ॥ दुर्गोत्सवेपि ॥ अत्र रत्नाति
थिचन्द्रोदययात्रिनसाधिय ॥ एवं ष्टमीं न दाकुर्यादन्यथा वैष्णुनेन वेदिति ॥ तथा चाष्टहं नवश्च नवश्चैनाव
योरंतरं कचित् ॥ तस्मात्सप्तमीविद्धा कार्या दुर्गाष्टमी तिथिः ॥ इत्यादीनि वाक्यान्यतद्विषयाणि त्वविषया
णि तिज्ञेयानि ॥ इति महाष्टमीनिर्णयः ॥ इहैव मासे शुक्लाष्टमी चश्चीशते लक्ष्मीशस्तेरास्य दुर्गा मध्यरात्रव्या
पिनी ग्राह्या ॥ तत्रापि तु नयत्र चंद्रोदयव्यापिनी स्तवा ॥ उत्तयत्रास्य चैपारा ॥ तथा च पुराणसमुच्चयवचनं ॥ सू
र्वा या यरविद्धा वा ग्राह्या चंद्रोदये तु या ॥ त्रिमुहूर्त्तापि सा सत्या पर तश्चोद्धुंगामिनीति ॥ इत्यष्टमीनिर्णयः ॥ अ
थ नवमी ॥ तत्रादौ रामनवमी ॥ चैत्रे चैत्रनवमी सिताधकरल ग्राहिस्तत्रसुयुक्तो दिनार्द्धे व्याहदिति नाभिना च
दिनमध्याप्तानवात्रा परा । लग्ने कर्कटके पुनासंतनुया प्राहि नाद्दे यत्नज्ञाव्याहितिने नकर्मसमयेऽस्य

म

व्यापि रामजन्मने ॥ इह ॥ व्याख्या ॥ चैत्रे मासि सिते नानवमीया फरतल गा मध्याह्नव्यापिनी ॥ श्रहित्यस्तयुक्तायुनर्व
सुयुतासा रामजन्मनेऽतिन ॥ तथा चोक्तमगस्त्यसंहितायां ॥ मेषं पूषणि संप्राप्ते लग्ने कर्कटकाह्वये ॥ आ
विरासीत्सकलया कौशल्यायां परः पुमानिति ॥ यदाह दिन पुनर्वसुविद्धितादिनमध्यप्राप्ताप्ता वा दिनमध्यं ना
प्राप्नातापि यराकार्या ॥ नवमी चाष्टमी विद्धा परायणेरिति अगस्त्यसंहितावचनात् ॥ लग्ने कर्कटके तिग्मुनेति
प्रागुक्तं ॥ चेघदिदिनद्वये समनत्नुव्याप्ता मध्याह्नव्याप्ता न बत्ति तत्र पुनर्वसुयुक्ता सा कार्या ॥ यदैकस्मिन्
दिने मध्याह्नव्यापिनी पुनर्वसुयोगस्तु दिनद्वयं विहाय प्राक्पश्चाद्भवति तदा मध्यव्यापिनी ग्राह्या ॥ क
र्मसमये स्वव्यापि रामजन्मत इ ॥ दिनद्वये मध्याह्ने नवमीयोगाभावे पुनर्वसुयोगस्तु दिनद्वये न भवति त
दोत्तरा ग्राह्या ॥ अष्टमीविद्धनिषेधात् ॥ यदैकस्मिन्दिने मध्याह्नव्यापिनी परस्मिन्दिने स्वल्पव्यापि पुन
र्वसुयुक्ता ग्राह्या ॥ तथा चोक्तमगस्त्यसंहितायां ॥ पुनर्वसुर्क्षसंयोगः स्वल्पोपि यदि दृश्यते ॥ चैत्रशु
क्लनवम्यां तु सा पुण्या सर्वकामदेति ॥ अथ पारणं ॥ श्रीचैत्रोत्सवेन्नवमीक्ताप परदिने नित्यं न केयार

चै

॥का॰नि॰मि॰॥ णदुर्गाख्याश्विषगा चसाष्टमी तिथिः स चाश्विन दर्शाश्विना॥ व्याख्या॥ चेयरिदृष्टा नवमी उपवासे कृता नत्रापरदि
॥२७॥ नेति षष्ठ्यं नेपारणी नवेत्॥ उपोषणेन नवम्यां च दशम्यामेव पारणम् इति निगमस्मसंहितायामुक्तं॥ इति रामनवमीनि
र्णयः॥ अथ दुर्गानवमी॥ इषमा नवमी आश्विन शुक्ल नवमी दुर्गाख्या सु दुर्गोत्सवे साष्टमी तिथिः स्यात् अष्टमीविद्धा
ग्राह्या॥ श्रावणी दुर्गानवमी दूर्वा चैव कृता तथा॥ पूर्वविद्धा च कर्तव्या शिवरात्रिर्बलेर्दिनमिति ब्रह्मनिव
चनात्॥ ॥इति नवमीनिर्णयः॥ ॥अथ दशमी॥ कालव्याप्तियुता नवेत्त्व दशमी द्विविधा तत्र वा यदा कृत्स्नाप
वयुता सितापरयुतान्या ग्राह्यावितेस्मृरितिः॥३७॥ व्याख्या॥ अत्रोपवासादौ दशमी कर्मकालव्यापिनी ग्राह्या
॥दिनद्वये कर्मकालव्याप्तिर्वा दिनद्वये कर्मकालाव्याप्तिर्वा अंशेन समव्याप्तिस्तदा कृत्स्ना पूर्वा॥ शुक्ला
परा स्मृरितिनिर्मिताशे ग्राह्येत्यर्थः॥ अथ विजयादशमीनिर्णयः॥ मासिषि विजयश्रवणाद्य दशमी काश्विन
तामा नृपप्रस्थाने विजयादशमीन रुसमन्वर्थया कृतिनीयदा॥ कृष्णं दे व्यापराह्णगा प्रथममुक्ताया प ॥रामः॥
राह्णेन चेदन्यथक दशमी मुहूर्तकमितापिस्या व्विनैवापारा॥३८॥ व्याख्या॥ इषमासि आश्विनेमासेसि ॥२७॥

तेदशमी सा विजयश्रवणाढ्या विजयमुहूर्तेणकादशस्यान्ते न चाव्याप्युक्ता कर्मण्याश्विनाश्रवणर्क्षसहिता सा विजया
दशमी नृपप्रस्थाने राज्ञां प्रायणे दशमीतरोः समन्विताहि ज्ञातव्या ग्राह्या॥ पुराणसमुच्चये॥ दशम्यां च नरैः सम्य
२७ क् पूजनीयापराजिता॥ ऐशानीं दिशमाश्रित्य अपराह्णे प्रयत्नत इति॥ श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थि
तो यतः उल्लंघयेयुः सीमानं तद्दिनर्क्षे ततो नरा इति कश्यपवचनं॥ ऋतिनीयदेति॥ यदा तु दिनद्वये कृतिः
श्रवणर्क्षेन स्याद्दशमी चापराह्णगा न भवति तदा प्रथमप्युक्त पूर्वा कार्या॥ चेदिनद्वये दशमी॥ अपराह्णे
न भवेत्॥ वांछो न स्म्यं नरे॥ नवमीशेषसंयुक्ता दशमी चापराजिता॥ ददाति विजयं देवी पूजिता जय
वर्द्धिनी॥ आश्विने शुक्लपक्षे तु दशम्यां पूजयेन्नरः॥ एकादश्यां न कुर्वीत अपराजितासमर्चनं॥ दशमी यत्र स
पुत्रेषु प्रस्थानं कुरुते नरः॥ तस्य संवत्सरं राज्ये न क्वापि विजयो भवेत्॥ अन्यथा स्फुरिति॥ यदि चान्यथा कृतः परदि
ने मुहूर्तमात्रा दशमी न भवति परत्रैकादशी चेत्तन्यायापि श्रवणन्वितास्यात्तदा परैव कार्या॥ तथा च कश्यपः॥
उदये दशमी च स्याद् रोहिणी घटिकोरस्था नोरे वसिद्धिरिति वा मा देकादशी विधानाम्ना स्मिस्तथा गहस्तां नारायनी बोधिनी

मध्याह्नस्मैकादश्यन्यह्नस्मैकादश्युपवासनिषेधश्च॥ सामान्यवाक्यतस्त्वथापि सिद्धांतवचने सर्वेषां सर्वादि
धेयाइति दृश्यते॥ तथा गृहस्थो ब्रह्मचारी च आहिताग्निस्तथैव च॥ एकादश्यां न भुंजीत पक्षयोरपि स्मृ
पुराणेन॥ तत्रैकादशी द्विधा॥ शुद्धा विद्धेति पुनस्त्रेधा॥ न्यूनसमाधिकेति॥ तत्रैका पुनस्त्रेधा। न्यूनसमाधि
कद्वादशीकेति॥ एवमष्टदशधा निरूप्यते॥ तथैवचोक्तं पद्मपुराणे शुद्धा विद्धा पुनस्त्रेधा न्यूनसमाधिके
॥ तत्रैकैका पुनस्त्रेधा द्वादश्युनसमाधिकैः॥ अस्य वचनस्य विवृतिः॥ शुद्धन्यूनान्यूनद्वादशीका॥ ५३॥
५७॥ ५८॥ २॥ १०॥ शुद्धन्यूनासमद्वादशीका॥ ५४॥ ५८॥ ६०॥ ३॥ १३॥ शुद्धन्यूनाधिकाद्वादशीका॥ ५५॥ ५८॥
६॥ ५॥ १२॥ शुद्धसमान्यूनद्वादशीका॥ ५५॥ ५८॥ ५॥ १२॥ शुद्धसमासमद्वादशीका॥ ५४॥ ६०॥ ६०॥ ६॥ १५॥
शुद्धनद्वादशिका॥ ५३॥ ६॥ ५८॥ ८॥ शुद्धाधिकासमद्वादशीका॥ ५४॥ ६॥ ४ ६०॥ ६०॥ १४॥ शुद्धाधिकाधि
कद्वादशीका॥ ५५॥ ६॥ ६॥ एवं विद्धापि नवधेति॥ विद्धन्यूनद्वादशीका॥ ५६॥ ५७॥ ५८॥ ३ विद्धन्यूनसम २८
द्वादशीका॥ ५७॥ ५८॥ ६०॥ २६॥ विद्धन्यूनाधिकद्वादशीका॥ ५८॥ ५८॥ ६॥ ६॥ विद्धसमान्यूनद्वादशीका॥ ५८

५८॥ ६॥ ६॥ विद्धसमान्यूनद्वादशीका॥ ५८॥ ६०॥ ५८॥ ६॥ ५६॥ ६०॥ ६॥ ८॥ विद्धाधिकान्यूनद्वादशीका॥ ५६॥ ६॥
५८॥ ७॥ विद्धाधिकासमद्वादशीका॥ ५७॥ ६॥ ६०॥ ७॥ विद्धाधिकाधिकद्वादशीका॥ ५८॥ ६॥ ६॥ एवमष्टद
शभेदा भवंति॥ तत्र विद्धास्त्याज्या इत्युच्यते॥ श्लो०॥ षट्पंचाशद्घटूरुवेधसहितासांसदावेदनवेः स्मार्तैस्तु रये ज्या
समात्मकहरिः शुद्धाधिकैकादशी॥ निःकामस्य परा द्वयी हरिपरस्याद्यान वेस्मातिनां सर्वेषां गृहमेधिनां च
विद्धानां निःस्पृहाणां पुराणे॥ ३०॥ व्याख्या॥ षट्पंचाशद्घटिकारूपामी वेधवतितदानूरूढवेधोदन्योरुणवेधस्त
सहितैकादशी वैष्णवैस्त्याज्या इत्यामीरूढव्याप्यर्थं तमामासन्सूर्योदयवेधस्तत्सहितास्मार्तैस्त्याज्येति
॥ तदुक्तं नविरूपष्पस्तुराणे॥ आदित्योदयवेधस्तस्मात्तु नोकथितो बुधैः॥ अरुणोदयवेधस्तु वैष्ण
वानां स्मृतः परैरिति॥ तत्र प्रथमपद्यं शुद्धा नणीयते॥ तत्रादौ शुद्धाधिकासमद्वादशीकायाः शुद्धाधिका
या निर्णयमाह॥ समात्मिकहरिरिति॥ समश्चात्मकश्च समात्मकौ हरी द्वादश्यौ यत्र सा समात्मकहरि
रेवंविधा शुद्धाधिकायैकादशी भवति तत्र निःकामस्य मुमुक्षोः परा द्वितीयैकादशी भवेत्॥ तथा च स्कांदे

॥निष्कामस्तु गृही कुर्याद्दुभे एकादश्यौ व्रतं॥ प्राप्तमेव तु वामा वा द्वादश्यां च द्विजोत्तमेति॥ हरिपरस्य परमप्य
र परायणस्य द्वयोरेकादश्योर्द्वि मयं भवेत्॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ लुप्यते द्वादशी तस्मि
न्नुपवासः कथं भवेत्॥ उपोष्ये द्वितिथी तत्र तिथौ विष्णुप्रीणनेन तत्परैरिति वृद्धवसिष्ठवचनात्॥ कामि
नां पुत्रिणां गृहिणां माया भवेत्॥ सर्वेषामिति निर्गुणत्वं श्रुत्ययोत्र धर्मेषिणामिति॥ निःकामिना गृहमेधि
नां विधवानां यतीनां चरेत्तिथ्यवस्था॥ तथा च मार्कंडेयः॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ पू
र्वामुपवसेत्कामी निःकामस्तूत्तरां वसेदिति॥ स्कंदपुराणेपि॥ प्रथमेहनि संपूर्णा व्याप्याहोरात्रमास्थि
ता॥ द्वादश्यां च तथा तासां दृश्यते पुनरेव सा॥ पूर्वा कार्या गृहस्थैस्तु यतिभिश्चोत्तरा विभो॥ विधवायाश्च तत
त्रैव परतो द्वादशी वेदिति॥ पुनर्मेशिनाहा॥ श्लोकः॥ शुद्धाधिकसमायत्तो हरितिथिस्तत्राथ वा तु स्वगाने
हानां चव तु ष्टये प्युपवसेत्स्नुवमिद्योषो जनः॥ वृद्धौ द्व हरिवासरो न च तिथिर्न्यूनो समाप्यायगास्मात्रै
र्द्विमियाद्यदा शिवतिथिः कार्या खिलैर्द्वादशी॥४०॥ व्याख्या॥ शुद्धान्यूनान्यूनद्वादशीकायाः शुद्धान्यून रामः २८

समद्वादशीकायाः शुद्धासमन्यूनद्वादशीकाया निर्णयमाह॥ शुद्धाहीनसमेति॥ अस्मिन्नेतासां चतुष्टये नर
चतुष्केप्यशेषो जनः स्ववमिवोपवसेत्॥ अत्र विवाद एव नास्ति॥ शुद्धन्यूनाधिकद्वादशीकायाः शुद्धसमाधि
कद्वादशीकाया निर्णयमाह॥ वृद्धावेति॥ चेद्यदि हरिवासरो द्वादशी वृद्धो न च तिथिरेकादशी न्यूना साम्या
वा न वति तदास्मात्रैराद्यगा कार्या द्विवोयथ्यास्मात्रै गृहणः सुमुक्षुनिर्वैष्णवैः परा कार्या॥ तथा च स्कंदपुराणे
॥शुद्धाद्याहा समा हीना समाहीनाधिकोत्तरा एकादशीमुपवसेत्तथा शुद्धां वैष्णवीमपि॥ एकादशी यदा शु
द्धा समनी स्यूयेद्दियमर्यंता न नो न्यूना वा॥ उत्तरा द्वादशी न्यूना समाधिका वा न वति तदा शुद्धामेकादशीमुप
वसेत्तन वैष्णवो द्वादशीमपि समर्थः॥ नवेदेकादशी विष्णुरौ— द्वादशी परतः स्थिता॥ उपोष्यैकादशी तत्र य
दिच्छेत्परमं पदमिति नारदवचनं स्मार्त्तविषयं परमं पदमिति मर्थवादः सुमुक्षुणा॥ अत्र रात्रौ यत्तास्मसम
र्वत्र विधानात् न च नैवं विज्ञाच्यं॥ तथा च॥ एकादशी न वेत्पूर्णा परतो द्वादशी यदा॥ तदा त्वेकादशीं त्यक्त्वा द्वा
दशीमुपोषयेदिति॥ संपूर्णैकादशी त्याज्या परतो द्वादशी यदि॥ उपोष्या द्वादशी शुद्धा द्वादश्यामेव वा यं

का.नि.सि. हत्तमिति॥ अविद्धापि च विद्धास्मात्स्मरणोद्धादशीय शीमादीनिष्कं स्कंदपुराणादिवचनानि मुमुक्षुविषयाणि। पुत्राधिक
३० द्वादशीकायानिर्णयमाह॥ हरिदिनमियारिति॥ यदास्मिन्विषये द्वादशी हरिविषयशिवनिथिरेकादशी हरिद्विरामु
यात्रहारिविलेः द्वादशी ननेकायां। शुक्लेप्येकादशीमाज्ञा वर्द्धने दिनयं यदिति॥ माधवविवंधेपि। एकादशः शी द्वा
दशी चेत्तु मयंवंद्धने यदा॥ तदा हरिविविनेरतं नान्यं स्मार्त्तैर्ग्राह्यं परं दिने मिति॥ इति नवानिः प्रकारैः शुद्धानि
र्णि — ना॥ दिक्षम्य विद्धानिर्णीयते॥ श्लो॥ विद्धैकादिका हरितिथिन्यूना सौमांस्मात्र नेकायान्स्तिन हरिःस्पु
न्नग्रहिणं नक्षत्रं नं स्मात्कविता॥ रेखाद्युपधिकाधिकान वतिथिः सवै विधेया परा विद्धन्यूनसामाधिकाच्चतति
थिः कार्या रिविधेयंतिमा॥ ७१॥ व्याख्या॥ विद्धाधिकान्तु नद्वादशीकायाविद्धाधिकासमद्वादशीकायानिर्णयमाह
॥ विद्धैकादशीकेति॥ एकादशी विद्धाधिका॥ हरितिथि द्वादशी न्यूनावासमावा जवतिनद्वात्रते सर्वैरपि स्त्रैस्त्या
हिनीया कार्या॥ पद्मपुराणे। द्वादशी मिश्रिता कार्या सर्वत्रैकादशी तिथिः। द्वादशी च त्रयोदश्यां विद्यते यदि वा न वे रामः
ति॥ तथा च॥ सर्वेष्वेकादशी ग्राह्या द्वादशी मिश्रिता नरैः॥ प्रातर्भवेत्तु वामा ये नो निस्पमुपोषणमिति॥ यत्तु ३०

माधवेनतु वृधिकावद्विद्धाधिकायामपि द्वादश्यनाधिकेयं हियतिव्यवस्थैव॥ एकादशी विद्धा चेत्तु लैकरूपे विवे
षतः। उत्तरां तु यतिः कुर्यात्पूर्वामेव महागृही इति माधवेन समसामान्यवचनादित्युक्तं॥ तत्संपूर्णैकादशी यत्र प्रभाते
पुनरेव सेत्यादि बहुवचनेकवाक्यनया माधवेन सवचनस्पष्टं द्विविषयत्वस्य व्युक्तत्वान्तनीवयुक्तं॥ विद्धाधि
कान्यूनद्वादशीकायाः केचिद्द्विश्वोपवक्रोत्तन हरिरिति॥ अविषये द्वादश्यां सेपुत्रवद्गृहिणं क्रविनक्रव्रतं स्मात्तैः॥
एकादशी द्वादशी च रात्रिशेषे त्रयोदशी॥ उपवासं न कुर्वीत पुत्रपौत्रसमन्वितः इति कूर्मपुराणवचनात्॥ द्वादश्यां
काद्वादशी विद्धा द्वादशी च स्तयं गतास्ते एणमासा द्वादशी ज्ञेया नेकं नवेत्र विधायत इति वृद्धवानानयवचनात्वा विद्धा
धिकद्वादशीकायानिर्णयमाह॥ वैष्णवाद्यधिकेति॥ वैष्णवदिनाधिका नवतिथिरेकादश्युपध्यधिका न दा सर्वैव
तेपरा विधेया॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ सर्वैरेवोत्तरा कार्या परतो द्वादशी यदीति॥ शुक्लेप्येका
दशी माज्ञा नर्द्धने दिनयं यदीत्यादिवचनात्स्पष्टमेव॥ विद्धन्यूनाधिकद्वादशीकाया। विद्धसमाधिकद्वादशीका
यानिर्णयमाह॥ विद्धन्यूनसमेति॥ यद्येकादशी विद्धान्यूनासमा वा भवत्ततुतिथिर्हरिरूपधिका ना॥ वतिनारा

का.नि.सि.
३१ ष्यखिलैरंतिम॥ द्वितीया कार्या॥ तथाच नारदः॥ उपवासस्तिनविद्धं यदा भवति पूर्वया॥ ७॥ द्वितीये क्रियते दानस्मात्सकला
पैकादशी तिथिः॥ नचोपवासो विहितः कथं नन्दस्तत्र॥ स्कस उ ७॥ यदा न प्राप्यते विप्रा द्वादश्यां पूर्ववासरः॥ रविच
काद्दशी मात्रापि नरो योपोष्यं परं दिनं॥ उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारयेत्॥ निर्गता चेत्त्रयोदश्यां कलावाद्धिकला
पिचेति॥ तथाच॥ स्मो॥ नंदाविद्धसमायत्राबाह शिंति थिर्न्दना समाप्यंचरेत् मुमुक्षो बुधः परं तोयदा नवति थिर्म्दला
नहाधारिखिलैः कार्यास्मिन्विषये परस्तु तत्तु नेमें दैदशाष्टाधिके रेषे को दशि कोदिता समंतिमतां सद्धैस्मवानां
नथ॥ ४३॥ व्याख्या॥ विद्धासमान्नना द्वादशी कार्या विद्धा समासमवादशिकाया निर्णयमाह॥ नंदाविद्धसमेति॥ य
दानंदैकादशी विद्धा समा भवति हरितिथिर्द्वादशी न्तु नावासमाप्यात्र दावने आगाचरेत्॥ तथा चोक्तं नारदेन॥ य
द्दिदेवा नउसंस्मिध्येदेकादश्यां दिर्नात्रयं॥ तत्र क्रतुशतं पुण्यं द्वादश्यां पारणे भवेदिति॥ द्वादशी स्वल्पमात्रापि य
दि नस्यात्परेह—नि॥ दशमी मिश्रिता कार्य महापानक नाशनी॥ त्रयोदश्यां नलभ्येत द्वादशी यदि किंचिन॥ उपोष्ये रामः
कादशी तत्र दशमी मिश्रिता सदा॥ पारणं हेन लभ्येत द्वादशी कलयापि चेत्॥ तदा॥ नीदशमी विद्धाप्युपोष्ये ३१

कादशी तिथिः॥ त्रयोदश्यां यदा न स्याद्द्वादशी घटिकायं॥ दशम्यैकादशी विद्धासेवोपोष्यासदा तिथिः॥ अविद्धानि नि
षिद्धेस्य लेलमं ते दिना निनु॥ मुहूर्तैः पंचभिर्विद्धा या सावैकादशी तिथिः॥ पंचनिमुहूर्तैर्विद्धा ग्राह्येत्येकं नतु
पंचमुहूर्तश्चिरुणोदयतः आरभ्य ज्ञेया इति केचित् अन्यथा मयोदियाद्वणिने न्यूनैकादशी न विद्धं नाहति॥ दशमी
शेषसंयुक्ता उपोष्येकदशी न दा॥ यदा न स्यात्रयोदश्यां सुहूर्तं द्वादशी तिथिः रिक्तादिक प्यशृगहारी न विद्धस्तु रहस्या
दिवचना निर्यरतो द्वादश्यतेना वेसका मस्मात्र्य पराणिः॥ अस्मिन्विषये पूर्वेद्युरेवोपवासोन्ये फवदादिश्यापप
रमुत्रार्यपरिणं॥ द्वादश्यामथमः पाहो हरिवासरसंज्ञितः॥ तमनतिक्रम्य कुर्वीत पारणं विष्णुतत्परः इति विष्णुधर्मोत्त
रात्॥ केचिद्विष्णुतत्पर इति वचनाद्वैष्णवविषयमेतद्दति॥ तदयुक्तं॥ मुमुक्षुर्भि परतः श्वतेदिति वेदाघात्॥ तथा
च विष्णुरहस्ये॥ दशमी मिश्रिता सर्वा हिरणी चैकादशी यदा॥ एकादश्यां महाप्राज्ञ उपवासः कथं भवेदित्युपक्रमो
क्त॥ शुद्धैव द्वादशी राजन्नुपोष्या मोक्षकांक्षिभिरिति॥ कूर्मपुराणेपि॥ दिनक्षये तु संप्राप्ते नोपोष्या दशमीयुता
॥ उपोष्या द्वादशी शुद्धा त्रयोदश्यां च पारणमिति॥ नविष्णुपुराणेपि॥ दिनक्षये तु संप्राप्ते उपोष्या द्वादशी नवे

का·नि·सि·
३२

न्ता॥ दशमीशेषसंयुक्तां न कुर्वीत कदाचनेति॥ तयोर्न्यूनत्वे भवति साम्ये किमर्थमुच्यते॥ मत्स्यमार्कण्डेयपि न्यूने भवत्ये
व॥ एकादशीपाः स्पृष्टेश्या मध्वाश्चियात्॥ तस्मात्साम्यविषये विरमुक्तं॥ न्यूनविषयेत्वच्यते॥ वृद्धिन्यूनात्वे न दशमीकाया
वृद्धन्यूनसमत्वाद्दशी कार्यानिर्णयमाह॥ यदा भवति तिथिर्न्यूनेति॥ यदास्मिन्विषये द्वादशीत्वन्यूनत्वे वा साम्ये भवति
थिरेकादशी न्यूना भवति॥ तदा विज्ञजनैराद्या कार्या॥ तथा च पद्मपुराणे॥ एकादशी द्विद्या विद्धा परतोपि न वर्ध
ते॥ यतिनिगृहिभिन्न्ये वसे वोपोष्या त्वयेति तिथिरिति॥ यतिनि गृहिभिरिमत्र गृहियद् पुत्रवद्भिर्हिभिन्नविवयं
ते घामेकादशीदिनत्रये तेषामुपवासनिषेधात्॥ अस्मिन्विषये परास्ननयुनेरिति॥ अस्मिन्विषये एकादशी
दिनत्रये तेषामुक्तत्वेपुत्रवद्गृहिभिः परा द्वानीयाद्वादशेक कार्या॥ एकादशीदिनत्रये उपवासं करोति यः॥ न
स्य पुत्राविनश्यन्ति मघायां पिंडतो यथेति॥ दिनत्रयेडसंभावे नोपोष्या दशमीयुता॥ यदि हैतु पुत्रपौत्राणाम
द्धिसंपदमात्मनः इति॥ एकादशीं पुनष्टमुरवैः संक्रमणं तथा पारणं चोपवासं च न कुर्यात्पुत्रवान्गृहीति॥ इ रामः
त्यादिवाक्यैः प्रतिषेधात्रैः द्वादश्या मेवोपवासः कार्यः॥ अन्यत्र॥ एकादशी यदा वृद्धा दिनत्रयतिथिर्भवेत्॥ त्र ३२

घ२

त्रयोपोष्या द्वादशी मध्ये या दशमं च पारणमिति॥ एकादशी यदा शक्लेन दिनत्रयतिथिर्भवेत्॥ तदा ह्येकादशीं त्यक्त्वा द्वाद
शीं समुपोषयेत्॥ इत्यादि पितामहगोभिलवचनेभ्यः॥ अत्र त्वत्र पितृपुत्रवद्गृहिविषयत्वं स्पष्टं न स्यत्तेन तथाप्याका
ङ्क्षावशाद्देवविषयत्वं भवति॥ इतरेषां सर्वत्रोपवासविधानेनाकांक्षाभावात्॥ एवमेषैकादशी दशाष्टाधिकैर
ष्टदशभिर्भेदैः स्मृतिमतान्साम्प्रत्यानिर्णीता हेतोः मद्भवानां हेतोरुदितावकथिता॥॥ एवमेकादशीनिर्णीयत व्रतनि
यमादिनिर्णयः॥ तत्र दशम्यादिदिनदशपर्यन्ते दिनत्रये ये नियमाउक्तास्ते तु काम्योपवासविषयाः सन्ति। तेयथा
॥ मत्स्यपुराणे॥ कांस्यं मांसं मसुरांश्चोद्रं चैव तथा भाषणं॥ व्यायामं च प्रवासं च दिवास्वापं च मैथुनं॥ तिलपिष्ट
मसूरं च दशम्यादिषु वर्जयेत्॥ आदित्यपुराणे एकादशी द्वादश्यौ गृह्येते॥ उपवासलक्षणं यथा॥ उपावृत्तस्य पापे
भ्यो यस्तु वासो गुणैः सह॥ उपवासः स विज्ञेयः सर्वभोगविवर्जितः॥ सर्वभोगविवर्जितदति समर्थक स्त्रीव
र्जमिति॥ तद्वर्जं गंधमाल्यालंकारतांबुलपुष्पमालानुलेपनं॥ अञ्जनं च समंतां बुलं कुंकुमं रक्तवाससी॥ धारये सो
पवासापि अवैधव्यकरं यतः॥ उपवासे तद्रव्यं निरंतनं धावनमंजनमिति गारुडे॥ तथा विष्णोर्नरे॥ विधवाया नि

का॰नि॰सि॰ मार्गेण कुमारी च यः रक्षयेत्॥ स नर्त्तकायाय रक्षयाव्रतमपि तैः॥ तथा चोक्तं॥ पत्न्यो जीवति या पत्यावुपवासव्रतं
॥३३॥ चरेत्॥ आयुष्यं हरते भर्तुर्नरकं चैव गच्छति॥ विष्णुरहस्ये॥ नारी खल्वननुज्ञाता भर्त्रा पित्रा सुतेन वा॥ निष्फलं
तु भवेत्तस्या यत्करोति व्रतादिकमिति मार्कण्डेये॥ इदं नियमादिकाम्यव्रतविषयं॥ पुनर्भोजनमध्वानं जागरमा
यासमैथुनं॥ उपवासफलं हन्तुर्दिवानिद्रा तथैव च॥ शाकं मांसं मसूरं च चरणं कांस्य कोरदूषकाः॥ क्षौद्रं मा
धुपरान्नं च हन्तुरष्टावि मे कैफलमिति मन्निवचने पुनर्भोजननिषेधस्तु काम्य एव॥ यतः॥ सायमाद्यन्तयो
रह्नोः सायंप्रातर्मध्यमे॥ उपवासफलप्रेप्सुर्जह्याद्भक्तचतुष्टयं॥ अथ नित्योपवासी वेत्सायंप्रातरभुंजि
क्रियां वर्जयेन्न नित्यमान्विप्र संप्राप्ते हरिवासरे इति विष्णुरहस्यात् तथा भक्तद्वयं नित्ये काम्ये भक्तचतुष्टयमिति॥ अ
थ श्राद्धदिवसे व्रतमन्यदेकादश्यां वा भावति तन्निर्णयः॥ श्लो॥ श्राद्धस्यैव दिने यदा भवति तिथिर्वान्यद्व्रतं वा भवेत्सं
कष्टदिने ये यथा चनन्न वेद्भोपस्त्यायान्नक्षं लतु॥ कृत्वा श्राद्धमिहाखिलं द्विजजनुर्नो यच्छेषमन्नं भवेत्तत्सर्वं तु निधाय ॥ रामः॥
रक्षिणकरे वघ्राणतः स्यादिदं॥ ४३॥ व्याख्या॥ यदा श्राद्धस्य दिवसे यदि किंचिदुपवासरूपव्रतं भवेदेकादश्यापि ॥३३॥

भवेत्॥ एवं संकष्टदिनयो प्राप्ते किं कार्यं यथा तयोः श्राद्धव्रतयोर्लोपो न भवेत्तथा कार्यं तत्स्फुलतु॥ इह श्राद्धकाले श्राद्ध
कर्त्रा द्विजभुजो जाता यां ब्राह्मणभोजनकृते यच्छेषमन्नं भवेत्तत्सर्वं दक्षिणे करे निधाय घ्राणं कुर्यात्॥
तत उभयसिद्धिः॥ तथा च॥ श्राद्धकृन्नाप्नुयो विप्रो न भुंक्ते पितृसेवितं॥ हव्यं देवान् गृह्णन्ति कव्यं च पितरस्तथेता
हीनि बहून्युपवासनिषेधकानि वाक्यानि॥ तत्र प्रतिप्रसवमाह स्कन्दपुराणे॥ यस्मिन्दिने पितुः श्राद्धं मातुर्वाथ भवे
त्तु हा॥ तस्मिन्नेव दिने तातनवेदेकादशीव्रतं॥ अन्यद्वापि व्रतं संकृतदा कार्यं च तच्छृणु नुप्प
ते यथा श्राद्धमुपवासोथवा गुह॥ इति विप्रतियन्नर्थेउर्यथः परमो मतः॥ रहस्योहि ता यः सर्वेषां नराणां शिशि
वाहन॥ श्राद्धदिनं समासाद्य उपवासो यदा भवेत्॥ तदा कृत्वा तु वै श्राद्धं भुक्तं शेषं तु यद्भवेत्॥ तत्सर्वं दक्षि
णपाणौ गृहित्वान्नं तु श्राद्धकृत्॥ अवजिघ्रेदनेनाथ तेन श्राद्धं हि शिखिध्वज॥ पितॄणां तृप्तिदं जातं व्रतं भवति नंगो
वियत इति॥ निर्णयसिन्धावेकादशीनिर्णयः॥ अथ द्वादशीनत्रपारणाहे स्वल्पाद्वादशी भवति तस्यां निसि
यमाह॥ श्लोकः॥ स्वल्पायां च द्वादश्यां पारणे हरिदिनस्थितिः पौर्वाह्णिकमाध्याह्निके कृत्यान्कृत्स्नमुत्कृष्ट मनन्तिषो तुका व्रतं पारये

न्येत्॥ संकष्टं यदि वा यस्य द्वैतकमिह प्राप्तं तदा द्वादशीमध्ये प्रारब्ध जलं समनोजनन्नमिदं श्राद्धं स्वकाले चरेत्॥४४॥ चेद्यदि
व्रतपारणे एकादशीव्रतपारणं यांहरिनिथिर्द्वादशी स्वल्पा मुहूर्त्तमात्रा वा द्विमुहूर्त्तमात्रा भवति॥ तदानूरुसमुद्गमे
रुणोदयस्य वेलाया मुत्थाय ष्ट्वन्हि विषयं यो वन्हिं मध्यं क्षेत्रं माध्याह्निकं तेउ नेतत्रैव तत्रावा नन्तुनियो स्वल्प द्वा
दश्यांव्रतं परियेत्॥ मत्स्यपुराणे यदा नवेदनीवाल्पा द्वादशी पारणं दिने॥ उषःकाले द्वयं कार्यं प्रातर्मध्याह्निक
मपि॥ एतस्मात्कारणाद्विप्रप्रत्यक्षेस्मिन माचरेदिति॥ अल्पायामपि॥ विप्रेंद्र द्वादश्या मरुणोदये स्नानार्चनक्रियाः कु
र्यात्तिनहोमादिसंयुतामिति नारदीये॥ कलाद्वयं त्रयं वापि द्वादशी मननिक्रमेत्॥ अतिक्रांता द्वादशी तु हंति पुण्यं
पुराकृतमिति मत्स्यपुराणवचनात्॥ अथात्र यदि यैत्र कंपित्र श्राद्धं विपयों संकष्टं यतति न द्वादशीमध्ये
जलं प्राश्य ततः स्वकाले श्राद्धं कालेस्वं नो जनं श्राद्धं चरेत्॥ यद्दा हदेवलः संकष्टे विषमे प्राप्ते द्वादश्यां पार
येत्कथा॥ अद्भिस्तु पारणं कुर्यात्पुनर्भुक्तं हीनो पकृदिति॥४५॥ अथाष्टौ महाद्वादश्यस्तासां निर्णयः॥ श्लोकः॥ अ
ष्टौ द्वादश्यो महत्यस्तदिना उन्मीलिनी त्रिस्पृशा नद्वत्पक्षवर्द्धिनी परतरा स्याद्वंजुली नो जया॥ पापघ्नी विजया

जयंत्यपि यदा शुद्धाधिकैकादशी सोक्तोन्मीलिनिका तथा हरितिथिः शुद्धाधिका विंजुली॥४५॥ एकादश्यपरुणोदये
स्त्रिजहरिस्तद्वा त्रिंशोप जया त्रिस्पृशाकथिता च पक्षयुगले हृद्याथ्य पक्षैधिनी॥ कृत्वा या विजया जयाथ गुरुज
मुक्तापापघ्न्यथोकेतु नाहिताहर्तैत जयंती केतु पवसेद्दृष्टौ महाद्वादशीः॥४६॥ व्याख्या॥ अष्टौ महाद्वादश्यः उदीर्ताः
॥ तायथाः॥ उन्मीलिनी १ त्रिस्पृशा २ पक्षवर्द्धनी ३ विंजुली ४ जया ५ पापघ्नी ६ जया ७ जयंती ८ तदुक्तं ब्रह्मवैवर्त्ते उन्मीलि
नी विंजुला च त्रिस्पृशा पक्षवर्द्धिनी॥ जया च विजया चैव॥ जयंती पापनाशिनी॥ द्वादश्योष्टौ महापुण्याः सर्वपापहरास्मृता
॥ रतिपमपुरस्से॥ नकरिष्यंति ये लोके द्वादश्यष्टममाज्ञयाने व्यांयमपुः रेवासो पावदाहूतसंप्लवमिति॥ बवन्ना ३
पावासेनिम्नवंशापितं न त्रतिथियोगद्यतस्त्रोनहतंत्रयोगाघतस्मश्चा॥ नवंर्द्दिनी निर्विवेकः परा शुद्धाधिका एकादशी
न बान्तिनदा उन्मीलिनी भवति॥ एकादशी तु संपूर्ण्या वर्द्धते पुनरेव सा॥ उन्मीलिनी नगुरुश्रेष्ठ कथिता पापना शि
नी॥ तिमाधंर्द्दये ववनं॥ यदा हरितिथिर्द्वादशी शुद्धाधिका भवति तदा विंजुली ज्ञेया॥ द्वादश्यामुपवासश्चे द्वा
दश्यामेव पारणं॥ विंजुली नाम सा प्रोक्ता कोटिहत्याविनाशिनी॥ यदैकादशी अरुणोदये यांते मासान भवति॥ समग्रं

का॰नि॰सि॰
३४

दिने हरिः शिरितिथिद्वादशीस्यादंते रात्रिशेषे जयात्रयोदशी भवति सा द्वादशी त्र्यहस्पृक् त्रिस्पृशा भवति॥ अरुणोदयव्या
सा सा द्वादशी एकत्र दिने च तेत्रयोदशी मानस्मिंस्त्रिस्पृहां ज्ञा सा प्रकीर्तिता॥ आद्यासादेकादशी वपरं पर्वसुगतो वुरा पर्वसु
मेर्हृद्धिं शासेपक्षवर्द्धनी द्वादशी मता॥ कुरुराके पद्दा वृद्धिः प्रयाति पक्षवर्द्धनी॥ विहायैकादशीं तत्र द्वादशीं समुपोषयेत्॥ इति
ब्रह्मवैवर्त्ते॥ स्कन्दाद्या श्रवणेन तु युक्ता द्वादशी विजया॥ गुरुनयुक्ता पुष्ययुक्ता जयानाम भवति॥ अथ कस्य कडकोडु
रोहिणी नयुक्ता पापघ्नी द्वादशी ज्ञेया॥ आदित्यपुराणे अद्दिने देवमानुनक्षत्रेण पुनर्वसुना युक्ता जयन्ती द्वादशी ज्ञे
या॥ पुष्यश्रवणे पुष्याद्यरोहिणीसंयुतास्तथा उपोषिताः सफला द्वादश्यो दृष्टोदृष्टफल॥ ३॥ इति ब्रह्मवैवर्त्ते॥ एता
अष्टौ द्वादशी उपवासे तत्॥ अथ विशेषतः श्रवणद्वादशी निर्णीयते श्लोकः॥ नादेवा द्वादशी कासिका॥ सिताश्र
वणयुक्तत्हान्चितार्थचेन्नहा योगं वै स्नुवं मुख्यपलं ह्यपवर्गान्तिति निष्पंन नानें नु टिः॥ शुद्धाधा द्वादशिकाधिका न्यथन
युक्तत्रांतिमां चेद्द्वौ नद्दैरुहगमेवविद्धा॥ मखिलोरुद्वंततोपावसेत्॥ व्याख्या॥ नाइद्वादशी सिता श्रवण राम:
नक्षत्रयुक्तभवति रोपवसेत्॥ नथा च स्कंदपुराणे॥ मासि भाद्रपदे शुक्ला द्वादशी श्रवणान्विता॥ महती द्वा ३४

दशी ज्ञेया उपवासे महाफला॥ बुधश्रवणसंयुक्ता सैव द्वादशी भवेत्॥ अत्यंतमहती तस्यां दत्तं भवति चाक्षय
मिति॥ तत्र यदा यावेषा अत्यंतमहती तस्यां दत्तं तु वरे कास्मिन्नेव दिने श्रवणयोगवती शुद्धाधिका वा विद्धा कि
का वा तस्यां संदेह एव नास्ति॥ यदा विद्धा किका दिनद्वयेपि श्रवणयोगवती नदैकादशी युता आह॥ नंदान्वि
ता चेदिति चेघरिद्वादशी नंदान्विता एकादशीपन्विता तदा विष्णुशृंखलद्वादशी श्रवणस्पृष्टा स्पर्शेदेकादशीयदा
स एव वैष्णवो योगो विष्णुशृंखलसंज्ञितः॥ उपोष्यविधिवत्तत्र नरः संक्षीणकल्मषः॥ प्राप्नोत्यनुत्तमां सिद्धिं पुनरा
वृत्तिदुर्लभामिति॥ विष्णुशृंखलयोगस्तु यदा श्रवणं एकादशीस्पृष्टा द्वादशी स्पृशति॥ तदुक्तं नारदीयेसं
स्पृष्टैवैकादशी राजन्द्वादशी यदि संस्पृशेत्॥ श्रवणं ज्योतिषां श्रेष्ठं ब्रह्महत्यां व्यपोहति॥ तत्रैकादशीद्वा
दशी प्राप्तमुपवासद्वयमेकतंत्रेण त्रतातिथ्यं तमं तेउतयोरंते भुक्तिः पारणा कर्त्तव्या॥ तिस्कंदपुराणे॥
तिथिनक्षत्रविनियमे तिथिनां ते चं पारणं॥ अतोन्यथा पारणायां व्रतभंगमवाप्नुयात्॥ इति॥ अत्यन्तरां
ते कर्त्तव्यमिति गोणं तिथिधिस्तु समायोगे उपवासो यदा भवेत् पारणं न तु कर्त्तव्यं यावन्नैकस्य संद्

यदत्तिनारदीये। तिथ्यंते तिथिभांते वा पारणं यत्र नोदितं॥ यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणं मिति स्कंदपु
राणोक्तमशक्तविषयं। यदा भुक्त्वाधिकारिणं धर्येति श्रवणयोगस्त्वनांते मासुपवसेत्॥ इति तन्नारदीये॥ दशम्य
व्यापिनी ग्राह्या श्रवणद्वादशीव्रत इति। चेद्यदि रवौ द्वादश्यां श्रवणं नक्षत्रं भवति तर्हि एकादशीगतं श्रवणं स्पृ
त्वा हि विद्धं। तदा एकादशीमुपवसेत्॥ अखिलेजनदसमर्थः वह्निपुराणे। द्वादश्यामेकादश्यां यत्र स्यात्सा तु नोपोष्या
नवेत्तिथिः श्रवणेन तु संयुक्ता सा सा पुण्या सा वैकामदेति तद्वा एकादश्यामुपवासस्तेन सहैकतंत्रमेव॥ एतत्राप्येते
द्वादशपः तासामुपवासो दिनानेदेनप्राप्नोति॥ अशक्तेन द्वयकार्यमशक्ते नैकः कर्तव्यः इत्याह श्लो०॥॥ अशक्तश्चे
द्व्रतद्युग्ममष्टहरिपुण्यो अशक्त एकादशीं त्यक्त्वा विद्धामुपवसेद्यदि गृही नैकादशीनिश्चयः तत्राधोसमुपोष्य
वापरदिने स्यचास्तु नंपारयेत्स्वरूद्वादशिका परांक्रमसमयव्याप्तोदिनागोयजो॥ व्याख्या॥ चेद्यदि कश्चि
दशक्तो भवति तर्हि हष्टहरियुक् अष्टम हाद्वादशिकायुगे कादशीव्रतमिति व्रतयुग्ममुपावसेदिति
द्वादश्यां ष्टेम हापुण्यासर्वपापहरा स्मृता॥ इति हष्टवीहारुतव चनात्यक्तं॥ पारणांतं व्रतं ज्ञेयं व्र

तेनेविप्रभोजनं स्वसमाप्ते व्रते दद्वैं नैव कुर्याद्दिनांतरमिति स्मृत्यंतरं॥ तत्स्वद्दिनांतरविषयं। इदं व्रतमेकदैव नंभ
वति। तत्र न विप्रोत्तरे॥ एकादशीमुपोष्याथ द्वादशीमप्युपोषयेत् न तत्र विधिलोपः स्यादुभयोर्दैवतं हरिः॥
यस्तूपवासद्वयासमर्थः स एकादशीं त्यक्त्वा विद्धां द्वादशीमुपावसेन्न उपोषयेत्॥ तदुक्तं नारदीये उपोष्य द्वा
दशीं पुण्यां वैष्णवर्क्षेण संयुतां एकादश्युद्भवं पुण्यं नरः प्राप्नोत्यसंशयं॥ वोडापयेयथा यज्ञे कर्महीनापि दी
नोपि दीक्षितः सर्वफलमवाप्नोति अस्नातोप्यहुतोपि सन् इति॥ तथा एवमेकादशीं त्यक्त्वा द्वादशी समुपो
षणे तु॥ पूर्ववत्पियासजं पुण्यं सर्वं प्राप्नोत्यसंशयमिति यस्तु तत्र नैकादशीसंकल्प उपवासद्वयासमर्थः स्तत्र
त्याह॥ यदि गृही नैकादशीनिश्चय इति॥ यदि गृहीन एकादशीव्रतस्य निश्चयो येनैवंविधः पुरुषः उपवासद्वया
समर्थः स्यात्तदा संकल्पितमप्यनेकादशीव्रतं विधाय परदिने द्वादश्यामप्युतं विद्धं तु प्रपूज्य पारणं कुर्यात्॥
इत्यर्थः॥ तदुक्तं मत्स्यपुराणे॥ द्वादश्यां शुक्लपक्षे तु नक्षत्रे श्रवणं यदि। उपोष्यैकादशीं तत्र द्वादश्यां पूजयेद्धरिमि
ति॥ हरिपूजेव नक्तपवास इत्यर्थः उपवासकरणेन तदंगहरिपूजायाः प्राप्तत्वात् एतद्विधानवैयर्थ्यात्॥ इति

का.मि.नि. श्रवणद्वादशीनिर्णयः॥ अथ वत्सद्वादशी॥ ॥ अत्र कुसमयव्यापिनी गोयजो गोपूजा। यां ग्राह्या॥ वत्सस्य पूजा काशि
३६ वरात्रिरेताः परा विनिर्मुक्तिन्पंसराहुमिति॥ अथ शयनी बोधिनी निर्णयः॥ ॥ श्लो०॥ ॥ द्वादश्यां शुचिनाद्रका
र्त्तिकसितस्वापांगवेवर्त्तनोद्बोधा मित्रभविष्णुनां॥ सपुरामध्यांत्यभागे हरेः। रात्रौ संधिदिनेषु तत्र नवबालाने
नुनिष्ठं शतनः स्वापार्थं हरिपादसेवनरतस्तत्रोत्सवं कारयेत्॥ ४९॥ व्याख्या॥ शुचिश्चाषाढो नभो भाद्रपदः कार्त्ति
कस्तत्र सिते पक्षे द्वादश्यां हरेः विष्णोः स्वापशयनं अंगवेवर्त्तनं पार्श्ववर्त्तनं उद्बोधः एतेषु क्रमित्रभमनुरा
धा विष्णुभं श्रवणं अंत्यभं रेवती नक्षत्रं पुरमध्यांतभागेसती निद्रोपेः अस्य विवेकः॥ आषाढसितद्वादश्या
मैत्राद्यभागे रात्रौ विष्णुः स्वपिति भाद्रसितद्वादश्यां श्रवणमध्यभागे संध्यायां पार्श्ववर्त्तनं। कार्त्तिके सित
द्वादश्यां दिने रेवत्यंतभागे विष्णुः प्रबुध्यतीति। तथा च भविष्योत्तरे॥ आभाका। सितपक्षेषु मैत्रश्रवणरेवं व
ती। आदिमध्यावसानेषु प्रस्वापावर्त्तनोत्थितिः। मैत्राद्यपादे स्वपितीह विष्णुर्वैष्णवमध्ये परिवर्त्तिमेति। पौ राम:
ष्णांत्यपादे च सुरारिहंता प्रबुध्यते मासचतुष्टयेन॥ तथा च। रात्रौ विष्णुः सद्वापाठे नाह्ने च परिवर्त्तते कार्त्तिके ३६

च प्रबुध्येत् शुक्लपक्षे हरेर्दिने॥ निशि स्वापो दिवोत्थानं संध्यायां परिवर्त्तनं॥ अथ नक्षत्रांशप्राप्तौ किमित्याह॥ नव
बाल्याभ इति तत्र तिथौ रात्रौ संध्यायां दिने च प्रोक्तमैत्राद्यपादाद्यलाभे विपरीतयोगे तिथिनिष्ठं शयनः इति प्रोक्त
निद्रादिकाले स्वापाद्यं निष्ठितं भावनि। विष्णुधर्मोत्तरे॥ विष्णुर्दिवा न स्वपिति न च रात्रौ प्रबुध्यते॥ द्वादश्याम
त्र संयोगो न कारणं॥ इत्यत्र हरिपादसेवनरतो विष्णुपरः स्वापादिकालोत्सवं कारयेदित्यर्थः॥ इत्याभाकानि
र्णयः॥ ॥ अथ त्रयोदशीनिर्णयः। श्लो०॥ ॥ शुक्लात्रयोदशी पुनापरा पराप्युना प्रोक्ता मनोन्नतिथिचैत्रेनंगयुजौ सिता
घुरलग्नाको व्याप्रदोषव्रते॥ नाक्तालिकाथ माधवे नरहरेर्जन्मिक्षु नूतः शुनः संध्याव्याप्तु भयोर्नवासमल
व व्याप्ता त्वराकान्विता॥ ५०॥ व्याख्या॥ शुक्लामनोन्नतिथिद्वैविद्वा प्रोक्ता। परा रस्मात्त्रयोदशी परयुता कार्या
साधारणनिर्णये दैवेशिकृत वचनात्। चैत्रमासि हीतानंगयुजो कामकृजनैः नंगत्रयोदश्यपि धुरलग्ना म
ध्याह्नव्यापिनी ग्राह्या दिनद्वये मध्याह्नव्याप्तौ दिनद्वयव्याप्तौ पूर्वैव॥ अनंगत्रयोदशी दंभादपोष्य पूर्वसंयुता इ
ति वचनात्॥ प्रदोषव्रते प्रदोषकालीनात्। आर्किणत्रानि नाशुना नाक्तालिका सायाह्ने॥ ॥ अथ नृसिंहचतुर्द

र्शी॥ माधवेवैशाखेत्रष्ठनंतःशुक्लचतुर्दशीनृसिंहचतुर्दशीसासंध्याव्यापिनीग्राह्या॥ नृसिंहपुराणे॥ वैशाखेशुक्लप
क्षेचचतुर्दश्यांनिशामुखेमकसंभवंपुण्यंव्रतंपापप्रणाशनं॥ वर्षेवर्षेतुकर्तव्यंममसंतुष्टिकारणमिति॥ उभयोर्दि
वसयोःसमत्वव्याप्तासमांशाव्याप्तावानव्याप्तास्तदापराबस्तत्रराकान्तिनाहर्णिमान्विताग्राह्या॥ तदुक्तंस्मृत्यंत
रा॥ स्वनंगेनसमयुक्तानोपोष्याचचतुर्दशीहरणीन्वितांतुतांकुर्यान्नरसिंहस्यतुष्टये॥ यःकरोतिनरोमोहात्कामवि
धांचतुर्दशींधनापत्यैर्वियुज्येततस्मात्तांपरिवर्जयेत्॥ इतिनृसिंहचतुर्दशीनिर्णयः॥ अथानंतचतुर्दशी॥
श्लो॥ भाद्रेनंतचतुर्दशीत्रणमुनेगव्यामासिनाग्रह्येनंतंस्मुषेपिचककामप्युकल्पनेकेव्यासमदोषव
जोयत्नास्पेचनिशीथगाशिवनिथिःश्रीहानिशीनेथेसमाहीनारात्रिमुखेतपस्सुषसितुग्पामत्रयोधेनियो
॥५१॥ व्याख्या॥ भाद्रेमासिसितेतचतुर्दशीसात्रणयुगमहत्रोदयव्यापिनीग्राह्यते। तदुक्तंस्कंदे॥ उदयेत्रिमुहूर्ता
पिग्राह्यानंतचतुर्दशी॥ मुहूर्तमपिचेन्मासेपूर्णिमायांचतुर्दशीसंपूर्णांविद्धितस्मात्जयेत्रिस्तुमव्ययमि॥ ॥रामः॥
अथनरकचतुर्दशी॥ इषेआश्विनेमासिकृष्णेनरकाख्याचतुर्दशीसास्नपनकेस्नानविधौचंद्रोदयेयानवतिचेद्गाह्यथा ॥३७॥

पिनीनवानिसाग्राह्येतिशेषः॥ भविष्योत्तरे॥ आश्विन्यांमासितेपक्षेचतुर्दश्यांविधूदयेस्नपनंनिजतैलेनसदा
कार्यंनिराज्ञमैः॥ विधूदयेसदाकामम्युकत्रयोदश्यायुक्ताग्राह्येति॥ भविष्योत्तरे॥ विधूदयेपरानस्मारिमासितेचतुर्दशी
जपाविद्भिनायांरिस्नायांनरःस्नायाद्विधूदयेदिनेचंद्रोदयेरवौ॥ आमाप्रदोषवलाविति॥ बलौबलिकार्येप्रदोषव्या
नामाह्येत्यर्थः॥ अथशिवचतुर्दशी॥ तपसिमाघमासेशिवतिथिःकृष्णाचतुर्दशीराज्ञास्मप्रदोषसमयेत्र्ययरंनिशी
थ्यागामध्यरात्रिव्यापिनीनवतिसाशिवरात्रिःश्रेष्ठा॥ प्रदोषवानिशीथेवाद्वयोर्वाप्तिसानवेतत्शिवरात्रिव्रतेतत्र
द्वयोःसत्वाप्रशस्यते॥ मोधवोदारूनवचनात्॥ प्रदोषार्द्धरात्रयोर्व्याप्ताग्राह्येति॥ तदुक्तंस्कंदपुराणे॥ दिनद्वयेसं
प्यद्दिरात्रेवर्जितेचेत्चतुर्दशी॥ परैवसाप्रकर्तव्यानचपूर्वाकदाचनेतिकेवलंनिशीथसमामध्याप्रोक्ताराजीमुखेहि
नाकेवलप्रदोषव्यापिनीहीनाकनिष्ठा॥ प्रदोषव्यापिनीग्राह्याशिवरात्रिःशिवप्रिये॥ रात्रौजागरणंतयस्मात्त
स्मात्तंसमुपोषयेत्॥ पूर्वोपवासकृतेपरदिनेयामत्रयोर्ध्वगामिन्यांचतुर्दश्यांउपसिप्रातःकालेतुकृतोजनंभ
वतितिथ्यंतेपारणंयाद्दवाक्तिसमापने॥ अन्यथापारणंमानरम्यतिष्णुपवासवत्॥ इतिमाधवचचनात्॥ प्रतिमा

का॰नि॰सि॰ सं शिवरात्रिव्रतं रात्रौ जागरणं हरार्चाविधानात्॥ बहुधा रात्रिव्यापिनी ग्राह्या॥ माघमासस्य कृष्णायां चतुर्दश्यां
३८ सुरेश्वर॥ अहं यास्यामि भूपृष्ठे रो नैव दिवा कलौ॥ लिंगेषु च समस्तेषु स्थावरेषु चरेषु च॥ संचरिष्यामि संदि
ग्धो वर्षपापविशुद्धये॥ तस्माद्रात्रौ च मे पूजां यः करिष्यति मानवः॥ मंत्रैरेतैः सुरश्रेष्ठ विपाप्मा स भविष्यति
इति॥ क्वचित्तु शास्त्रे प्रत्यनुकल्प्यते नैकस्य वाद्ययोर्वा श्रवणं॥ अथ शिवरात्रिपूजा॥ जागरणेन नयेत्॥ कश्चि
त्तु एप विशेषेण व्रतहीनोऽपि यः पुमान् जागरणं कुरुते यस्तु उपवाससमन्तो व्रजौ तु इति॥ यच्च शिवाय सम
र्पितं तत्समादरूपेण पुष्पनैवेद्यादि विद्युत्तु निवेदित वस्तु वत् नोपयोज्यं॥ दृष्ट्वा रुद्रस्य निर्माल्यं सवासा
ः सचुतः शुचिः॥ इति कालिकापुराणे॥ अग्राह्यं शिवनिर्माल्यं पत्रं पुष्पं फलं जलं॥ शालिग्रामशिलास्प
र्शात् सर्वं याति पवित्रतां॥ नैवेद्यवस्त्रादीनि तादृशीत निर्माल्यं तु ग्राह्यमेव॥ तदुक्तं स्कांदे नरकेपतिते घोरेति
यग्पो नो च संजवे व्रतहामि शुचिः स्यान्स्तः निर्माल्यं यस्तु धारयेत्॥ तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते रामः
॥इति॥ श्रुति नानयंत्र मनुपनीतेनेनिकेचितास्कंदपुराणे॥ निर्माल्यं यो हि मद्भक्तः शिरसा धारयिष्य ३८

ति॥ अशुचिर्भिन्नमर्यादो नरः पापमवाप्नुति॥ शिवदीक्षारहितस्यवानग्राह्यमिति केचित्॥ इति निर्णयसिंधौ
तु चतुर्दशीनिर्णयः॥ ॥ अथ पूर्णिमावास्ये निर्णीयते॥ श्लोक॥॥ सावित्रीवटपैत्रिकी मनुयुता ग्राह्या वटस्या
र्चनेरह्वार त्रनाडिकाधिकचतुर्दश्यान्विताऽपरा॥ सर्वत्रिस्त्रातृणकाल गाव्रतविधौ ग्राह्याकुहूः पूर्णिमासक
मा ससमाप्य मेन सहिताऽस्तान्ये च दानेषु ताः॥ परा व्याप्या॥ वटस्यार्चनेवट हुजायां सावित्री पूर्णिमा मनुयु
ता चतुर्दश्यन्विताऽपरा॥ वटपैत्रिकीत संबंधि न मावास्यापि मनुयुता चतुर्दश्यन्विता कार्या॥ तदुक्तं स्मृत्यं
तरे॥ कृष्णाष्टमी बृहत्तपा सावित्री वटपैत्रिकी॥ अनंगत्रयोदशी रंभा उपोष्याः पूर्वसंयुते इति॥ चेघस्त्रार्द्धनाडि
काधिक चतुर्दश्यन्वित पूर्णिमा वा कुहूर्भवति तदापराग्राह्यान्यतोः स्त्रादशनाडीसिद्वेष यत्सुत्रयां तिथिं॥ इति
माधवोक्तवचनात्॥ एतद्व्रतद्वयव्यतिरिक्ते सर्वकुहूश्च मावास्या पूर्णिमा त्रिस्त्रण काज गात्रि मन्त्र व्या
पिनी ग्राह्या॥ व्रतविधौ कर्तव्यास्त्रयस्त्रिंशति नाकुहान वर्जयित्वा मुनिसुनिश्रेष्ठ सावित्रीव्रतमुत्तमामिति
व्रतवैवर्तवचनात्॥ एकादशी तथा षष्ठी पूर्णिमासी चतुर्दशी॥ अमावास्या तृतीया च ता उपोष्याः परा

न्विता॥ इति विस्तुथ मेन्नरे॥ एकादशीं मासी मास समाख्येन नामसंनाम नक्षत्रेण युतानाव तिनदास्तानदाना
ऽऽशेषु नाप्तास्ता॥ स्वनाम नक्षत्रमिति चेत् तस्य चित्रा वैशाखस्य विशाखा रघोति इत्यादि तु॥ ॥ इयमापूर्णिमा निर्णि
उपवासयो॥ ॥ अथोपाकर्म॥ ॥ तत्र प्राक्छ्रवणस्थे आयलवक वा यद्धतु युक्तं गृह्यं कुर्युः श्रावणकर्म मासि न नामि
त्युत्येन नेत्रिपत्र गणेन॥ नं हास्ये हुतिथो यजुर्वेदश्च प्रातास्ति चेत्संगवतुष्टायां निशीथ दृनवत्वात् नत्यासाकसं
क्रांतितः॥ ५३॥ व्याख्या॥ नन्तसिश्रावणो मासि न्नक्षि दिनमानेन चेथाविनक्ते आरिलवके दूवह्निःश्रवणे र्वेमति॥ कि
लग्नलेश्रवणेऽपि वायूनां तद्रोधनिष्टानपुज्जितपुक्ते तद्विरः॥ ऋग्वेदिनः श्रावणे कर्म उपाकर्म कुर्युः॥ यजुर्वेदि
स्तुनदां वें हृतिथौ प्रतिपद्युक्त पूर्णिमायां श्रावणं कर्म कुर्युः॥ तथा च परिशिष्टे॥ धनिष्ठा प्रतिपद्युक्ते त्वाष्ट्रधि
युत समन्विते नि॥ श्रावणं कर्म कुर्वीन रल्गपनुः सामपाउगाः इति॥ अस्याविवरणं॥ धनिष्ठायुक्ते श्रवणे ऋ
ग्वेदिनः॥ प्रतिपद्युक्त पूर्णिमायां यजुर्वेदिनः त्वाष्ट्रधिष्ण्ये चित्रानपुक्ते हस्ते सामगाः श्रावणं कर्मोपाकर्म कुर्वी रामः
रन्नित्यर्थः॥ यहोदयिक नक्षत्रं तन्त्रिमुहूर्तात्मकं ग्राह्यं तेन तत्रेत्रिमुहूर्तन्यूनत्वे तेन कुर्युः॥ तथा चोक्तं पा ३९

रिशिष्टे॥ उदये संगवस्पर्शेऽह्नो पर्वणि चापरे॥ कुर्वन्ति तस्युपाकर्म ऋग्यजुः साम गाः क्रमात्॥ इति यजुर्वेदिसु इदं
यं हस्तर्णमासी चेयदि संगवमा मास्ति तत्रोपाकर्म कुर्युः॥ अन्यथा पूर्वविधायामेव॥ तथा च गार्ग्यः श्रावणी पूर्ण
मासी च संगवास्पर तो यदि तदैवो दयिकी ग्राह्या नान्या वोदयिकी भवेत्॥ ३ दृष्टाया मित्याद्दिनिशीथात् मध्यरात्रत
पूर्वं ग्राह्यं तत्र चंद्रस्य यास मत्या कीस्य संक्रांति संक्रमः तास्मांडश्यायां न कुर्युरिति॥ संक्रांतौ ग्रहणं वापि यदि प
र्वणि जायते॥ उपाकृतिस्तु पंचम्यां कार्या वाजसनेयिभिरिति॥ संक्रांतौ ग्रहणे वापि सूतके मृतके पि वाग
णस्मात् न कुर्वीत तनारदस्य वचो यथा॥ निशीथादूर्द्ध चेद्धनीग्रहणं वा संक्रांतिस्तदा पूर्णिमायामेव कर्तव्यं न
या च गागाः॥ ऋद्धरात्रादधस्तात्रे संक्रांतिर्ग्रहणं तवेतनु उपाकर्म न कुर्वीत परतश्चेन्न दोषभागिति॥ निशीथा
दूर्ध्वं क्रियहणं संक्रांतौ वा किं कार्यमित्याह॥ श्लो॥ ॥ दुष्टे पर्वणि पूर्वं यं चमतिथो॥ हस्ते श्रवण्यादयेन तत्रो पपत्र
वेतनस्य हरिनेतन्नस्पूर्णिमायां करे॥ सिंहः कर्के रविस्तेषु राक्रसमवाये कुर्युस्तथा सामगाः॥ ५ क्रांते प्राक्तेषु राक्तगेन
वनवैस्तुल्यप्युत्रावेदये॥ ५४॥ व्याख्याः॥ ॥ प्रागुक्त ग्रहणसंक्रांतितः पर्वपर्वणि पूर्णिमा तिथौ दुष्टे सदोषेस

तिपंचमनिश्रावणेसितपंचम्यांहस्तोहस्तयुक्तायांवाद्वयेऽथकर्पंचम्यामेवहस्तेवोपाकर्मकुर्युः॥ तदुक्तंकात्यायनेन
॥अथातोध्यायोपाकर्मौषधीनांप्रादुर्भावेश्रवणेनश्रावण्यांपौर्णमास्यां श्रावणस्यपंचमीं हस्तेनवसिनियाज्ञ
वल्क्येनापिकालचतुष्टयमुक्तं॥ अध्यायानामुपाकर्मश्रावण्यांश्रवणेनवा॥ हस्तेनौषधिभावेवापंचम्यांश्रावण
स्यतु॥ अथतत्रश्रावणस्यकालद्वयेपंचम्यांहस्तेवापर्वणिवौषध्यन्तवे॥ ओषधिनामनर्वा अग्राह्याविनन्
स्येमाहेहरितश्रवणेतत्रावातत्पूर्णिमायांनाद्रष्टिस्ततिमायांवाकरेनाहस्तेनेप्युपाकर्मकुर्युः॥ तथाचमनुः
॥श्रावण्यांप्रौष्ठपद्यांवाप्युपाकृत्ययथाविधिः युक्तश्छंदांस्यधीयीतमासान्विप्रोर्द्धपंचमान्॥ अपरार्के नारद
हस्तेश्रवणेमंत्रमीनमुपाददानं॥ तथाचपरिशिष्टे अवरथोछेपथपतस्मिन्मासेनोसंभवंतिचेत्॥ तदाभाद्र
पदेमासिश्रवणेनतदिष्यते॥ अथबौधायनतैत्तरीयशाखिनांग्रहसंक्रमदृष्टायांश्रावणपौर्णमास्यांप्रौष्ठप
दीकालः प्रशस्ताः उक्ताः॥ सिंहसंक्रांतिदुष्टायांश्रावण्यांतैत्तरीयकैः प्रौष्ठपद्यामुपाकर्मकार्यंबौधायनेरि
ति॥ अपिशिष्टात्बौधायनानामाषाढ्यामप्युक्तं॥ अथसामगानामुपाकर्मोच्यते॥ सिंहेऽर्कहस्तेसिंहसं

क्रांतौसत्यां॥ रविनेहस्तत्रैक्ष्यपराह्णकालव्यापिनिसामगाउपाकर्मकुर्युः॥ सिंहेरवौ ग्र१ पाताः॥ उपाकर्म
पराह्णेस्यादुत्सर्गप्रातरेवहि इतिछंदोगविषयं॥ तत्पुष्पात्प्रेरितिउपक्रम्यास्युक्तेपराह्णेतुहस्तेनउपाकर्मपि
राह्निकमितिगार्ग्यवचनात्॥ अत्रदर्शकपराह्णोनागौविद्धाविनक्रौछंदोगानामेव॥ नतपराह्णेनक्षत्रयोग
मिक्रोरयिकग्रहणं॥ किंतुद्यक्रौनिर्णिति॥ द्वाक्रौरपराह्णेनेनक्षत्रेमतिचपरंध्यक्रौर्भस्यामावेवाजवेरंश्रोभ
घ्यक्रोपराह्णव्यासोमत्यामपिक्कुरयिकेउक्तेनक्षत्रेसमगाः कुर्युरित्यर्थः॥ उदयेसंगवस्पर्शेश्रुतोपर्वणि
भोवार्कभेकुर्युर्नतस्पुपाकर्मकृग्यजुःसामगाःक्रमात्॥ इति॥ अत्रछंदोगानांतुसिंहेरवाविल्युक्तत्वाद्भाद्र
मासेपिउपाकर्मोत्सर्गौभवतएव॥ अतएवस्मृतिसंग्रहेस्पष्टंप्रथममहोग्रहणं॥ गुरुकनाबीगवभोमेविवे
बाल्येवावार्द्धकेपिवा॥ तथाधिमाससर्पमलमासादिषुद्विजेप्रथमोपक्रान्तिनस्यात्कृतकर्मविनाशक
त् इति॥ अत्रप्रथमोपाकृतिनिषेधेयदधिमासहणंतत्द्वितीयादिप्रवृत्तार्थंछंदोगविषयं॥ यत्तुउपा
कर्मतयोत्सर्गप्रसवाहोत्सवाष्टकाःमासवृद्धौपरत्रस्युःवर्जयित्वातुपैतृकमितिमितिनिषेधवचनंछंदो

गव्यतिरिक्तोन्यविषयं। तस्मात्सामगानां सिंहार्क एव॥ न वाधिमासे उत्कृष्यते॥ आश्वेचान्नाकारिना चतुर्दतिक्रमेण
तुप्यत एव। एवं च हसंक्रांतिरूषितेपि॥॥ इत्युपाकर्मनिर्णयः॥॥ अथोत्सर्गविधिः॥॥ श्लो०॥॥ पौषेमासिकनेथवा
ष्टमतिथौ कृत्स्नमुद्धृतोत्सर्जनं प्रोक्तं मंत्रयित्वांतदेवरविसेतनत्प्रागुपाकर्मतः॥ तद्वत्सामविदां रवौ हरिगते दे
धाक्कि दूर्वाक्कि के वेदोत्सर्जनमिज्यते क्वचिदिदं कर्कगते भास्करे॥ व्याख्या॥ पौषेमासिकने रोहिण्यां वाष्टम
तिथौ अष्टम्यां कृत्स्नपठेष्टश्रुतस्याध्ययनस्योत्सर्जनं। उत्सर्गः प्रोक्तः तत्र याज्ञवल्क्यः पौषमासस्य रोहिण्यामष्टि
कायामथापि वा। जलांते छंदसां कुर्यादुत्सर्गं विधिवद्बहिरिति॥ पौषस्य रोहिण्यां मध्यमायां वाष्टकायामध्या
यानुत्सर्जेदिति कात्यायनवचनं॥ अर्द्धषष्ठमासानधीत्य अजेषु रर्द्धसप्तमान् इति कात्यायनवचनं सर्वेषामाश्रा
प्ता। तथापि कलौ मंदमतीनां तस्मिन्नेव दिने उत्सर्जनं उपाकर्मतः प्राग्युक्तः तथा च ---- गृह्येपुष्ये तूत्स
र्जनं कुर्यादुपाकर्मदिनेथवेति॥ तद्वत्सामपि विदां रवौ हरिगते सिंहेऽर्के सति। देधा क्वचिदितरेक्रे दूर्वाक्के
कर्क दूर्वाक्कचापि नीज्यते पुष्यमेवेदोत्सर्जनं प्रोक्तं। सिंहेऽर्के पुष्यकर्दृके दूर्वाक्केदिचरेद्बहिः छंदोगाः मिलि

ता। उत्सर्गं सर्वछंदसामिति क्वचिदिति। यदा तु सिंहस्थे सूर्ये प्रथमतो हस्त एव न वनितत्ष्टे न्सर्वतः पुष्यस्तु कर्कस्थे
। तदा इत्युत्सर्जनं न चैव कर्कगते भास्करे प्रोक्तं। क्वचिदिति मासे प्रोष्ठपदे हस्ते तस्मात्पुष्यः कुर्वीन वेयदा
न हानुश्रावण्यां कुर्यादुत्सर्गं छंदसां द्विज इति कात्यायनवचनात्॥ इत्युत्सर्गः॥ श्लो०॥॥ रक्षाबंधनपूर्वकं ह
लमिहश्रावण्यां चरेत्॥ श्रावण्यामपराह्णके विजमिहं विद्धो क्विनायामथ॥ व्याख्या॥ रक्षाबंधनपू
र्वकं हलिकर्माचारश्रावणं हलनिष्कर्षणं तदत्र मार्गाग्नितायां पूर्वविधायामवचरेत्॥ अपराह्णके का
